दिनाङ्क :-04.01.2025

प्रात: - 06:55

<u>लोकसभा - राष्ट्रपतिः</u>

संसदः संयुक्तसदने राष्ट्रपतेः अभिभाषणस्य धन्यवादप्रस्तावे लोकसभा-राज्यसभयोः ह्यः चर्चा जाता। चर्चावधौ विपक्षदलीयः नेता कांग्रेसदलसांसदः च राहुलगान्धी उक्तवान् यत् राष्ट्रपतेः अभिभाषणं प्रशासनस्य प्राप्तोपलब्धीनां एका दीर्घा सूची वर्तते। वृत्यभावविषये श्रीगांधी अवदत् यत् देशस्य भविष्यं यूनां हस्तयोः वर्तते तत्सम्बद्धं प्रकरणं सर्वप्रथमम् उत्थापनीयम् । असौ अग्रे उक्तवान् यत् इदं प्रशासनं वृत्यवभावं दूरीकर्तुं विकलमस्ति । अन्ते च असौ कथितवान् यत् संविधानं सर्वोच्चं देशस्य च सर्वदा मार्गदर्शनं करिष्यति। इतः पूर्वं भाजपेतिदलसांसदः रामवीर-सिंह-बिधूड़ी इत्यसौ नरेन्द्रमोदिनः नेतृत्वयुतप्रशासनस्य अधिगतोपलब्धयः सूचीबद्धं कृतवान् । अस्यां सूच्यां जनकल्याणकारिण्यः योजनाः अपि सम्मिलिताः आसन्। असौ दिल्ल्यां सप्तदशशतं यावत् अनधिकृतोपनिवासानां निवासिभ्यः स्वामित्वाधिकार- प्रदानाय केन्द्रप्रशासनेन उत्थापितानां पदक्षेपाणामपि उल्लेखं कृतवान् । श्रीबिधूड़ीइत्यसौ नगरे प्रतिकूलमार्गस्थितिः वायुप्रदूषणं सार्वजनिकपरिवहनं प्रकरणं उत्थापितवान्। भाजपेति-दलसांसदः रविशङ्कर प्रसादः आक्षिप्तवान् यत् यदा महाकुम्भस्य वार्ता भवति तदा काँग्रेसदलम् अप्रसन्नतां प्रकटयति । अपरत्र साम्प्रतं यावत् पञ्चत्रिंशद्- कोटिजनाः पवित्रस्नानं तत्र कृतवन्तः।

<u>महाकुम्भः - भूटाननरेशः</u>

भूटानदेशस्य नरेशः जिग्मे- खेसर- नामग्याल- वाङ्गचुक- इत्येषः अद्य प्रयागराजं महाकुम्भं प्रति यास्यति। तत्रासौ त्रिवेण्यां सङ्गमे पवित्रावगाहनं समाचरिष्यति। भूटाननरेशः ह्यः उत्तरप्रदेशे लखऊनगरं सम्प्राप्तवान्। देश- विदेशयोः कोटिशः श्रद्धालवः महाकुम्भे सम्मिलिताः भवन्तीति। एते श्रद्धालवः गङ्गा- यमुना-

सरस्वती-नदीनां सङ्गघट्टे स्नानं समाचरन्ति। भूटानदेशस्य राजा प्रयागराजे अक्षयवटं बडेहनुमानमन्दिरं च प्रति दर्शनार्थं गमिष्यति। अत्रावसरे उत्तरप्रदेशस्य मुख्यमन्त्री योगि-आदित्यनाथः अपि उपस्थितो भविष्यति।

## दिल्ली- विधानसभा

सप्तति- सदस्यात्मिकीयायै दिल्ली- विधानसभायै श्वः मतदानं भविष्यति। निर्वाचनात् प्राक् सर्वविधसज्जताः क्रियमाणाः वर्तन्ते। मतदानं बुधवासरे प्रातःकाले सप्तवादनात् सायंकाले षड्वादनपर्यन्तं प्रचलिष्यति। नवनवत्यधिक- षड्शत- सङ्ख्यकानां प्रत्याशिनां नियतिनिर्णयम् आहत्य षड्-पञ्चाशल्लक्षाधिकैककोटिजनाः करिष्यन्ति। ह्यः निर्वाचनप्रचारः अवसितः। मतगणना शनिवासरे भविष्यति। निर्वाचनायोगः भूयोऽपि सार्धैकलक्षं यावत् कर्मिणः नियुक्ताः कृतवान्।

## अमितशाहः

केन्द्रीयगृहमन्त्री अमितशाहः अद्य नवदिल्ल्यां जम्मू-कश्मीरे समायोक्ष्यमाणस्य एकस्य सुरक्षा-समीक्षोपवेशनस्य अध्यक्षतां करिष्यति। एतस्मिन् उपवेशने जम्मूकश्मीरस्य उप-राज्यपालः मनोजसिन्हाः गृहसचिवः गोविन्द- मोहनः गुप्तचर विभागानां प्रमुखाः अन्ये च वरिष्ठाधिकारिणः उपस्थिताः भविष्यन्ति।

## टेबल-टेनिस प्रतिस्पर्धा

सिङ्गापुरदेशे वर्ल्ड- टेबल- टेनिस- इत्येतस्यां प्रतिस्पर्धायां मानुषशाह- दियाचिताले- इत्यनयोः भारतीय- मिश्रितयुगलम् अद्य षोडशचक्रे मैक्सिको देशस्य मार्कोस- मैड्रिड- अरांत्सा- कोसियो- इत्युभाभ्यां सह क्रीडिष्यति।